**प्रश्नः 1. एकपदेन उत्तरत**–(एक पद में उत्तर दीजिए–)

(क) कस्य राज्यस्य भागेषु गजधरः शब्दः प्रयुज्यते?

(ख) गजपरिमाणं कः धारयति?

(ग) कार्यसमाप्तौ वेतनानि अतिरिच्य गजधरेभ्यः किं प्रदीयते स्म?

(घ) के शिल्पिरूपेण न समादृताः भवन्ति?

**उत्तरम्**– (क) राजस्थानस्य, (ख) गजधरः, (ग) सम्मानम्, (घ) गजधराः।

**प्रश्नः 2. अधोलिखितानां प्रश्नानामुत्तराणि लिखत**–(निम्नलिखित प्रश्नों के उत्तर लिखिए–)

(क) तडागाः कुत्र निर्मीयन्ते स्म?

(ख) गजधराः कस्मिन् रूपे परिचिताः?

(ग) गजधराः किं कुर्वन्ति स्म?

(घ) के सम्माननीयाः?

**उत्तरम्**– (क) तडागाः अशेषे हि देशे निर्मीयन्ते स्म।

(ख) गजधराः 'समाजस्य गाम्भीर्यस्य मापकाः' इति रूपेण परिचिताः।

(ग) गजधराः नवनिर्माणस्य योजनां प्रस्तुन्वन्ति स्म, भाविव्ययम् आकलयन्ति स्म, उपकरणभारान् संगृह्णन्ति स्म।

(घ) गजधराः सम्माननीयाः।

**प्रश्नः 3. रेखाङ्कितानि पदानि आधृत्य प्रश्न-निर्माणं कुरुत**–(रेखांकित पदों के आधार पर प्रश्न-निर्माण कीजिए–)

(क) <u>सुरक्षाप्रबन्धनस्य</u> दायित्वं गजधराः निभालयन्ति स्म।

(ख) <u>तेषां</u> स्वामिनः असमर्थाः सन्ति।

(ग) कार्यसमाप्तौ <u>वेतनानि</u> अतिरिच्य सम्मानमपि प्राप्नुवन्ति।

(घ) <u>गजधरः</u> सुन्दरः शब्दः अस्ति।

(ङ) <u>तडागाः</u> संसारसागराः कथ्यन्ते।

**उत्तरम्**– (क) **कस्य** दायित्वं गजधराः निभालयन्ति स्म?

(ख) **केषां** स्वामिनः असमर्थाः सन्ति?

(ग) कार्यसमाप्तौ **कानि** अतिरिच्य सम्मानमपि प्राप्नुवन्ति?

(घ) **कः** सुन्दरः शब्दः अस्ति?

(ङ) **के** संसारसागराः कथ्यन्ते?

**प्रश्नः 4. अधोलिखितेषु यथापेक्षितं सन्धिं/विच्छेदं कुरुत**–(निम्नलिखित में यथापेक्षित संधि या संधि -विच्छेद कीजिए–)

| | | |
|---|---|---|
| (क) अद्य | + अपि | = ..................... |
| (ख) ..................... | + ..................... | = स्मरणार्थम् |
| (ग) इति | + अस्मिन् | = ..................... |
| (घ) ..................... | + ..................... | = एतेष्वेव |
| (ङ) सहसा | + एव | = ..................... |

**उत्तरम्**– (क) अद्यापि, (ख) स्मरण + अर्थम्, (ग) इत्यस्मिन्, (घ) एतेषु + एव, (ङ) सहसैव।

**प्रश्नः 5. मञ्जूषातः समुचितानि पदानि चित्वा रिक्तस्थानानि पूरयत**–(मञ्जूषा से उचित पदों को चुनकर रिक्त स्थानों की पूर्ति कीजिए–)

| रचयन्ति | गृहीत्वा | सहसा | जिज्ञासा | सह |
|---|---|---|---|---|

(क) छात्राः पुस्तकानि ......................... विद्यालयं गच्छन्ति।

(ख) मालाकाराः पुष्पैः मालाः .........................।

(ग) मम मनसि एका ......................... वर्तते।

(घ) रमेशः मित्रैः ......................... विद्यालयं गच्छति।

(ङ) ......................... बालिका तत्र अहसत्।

**उत्तरम्**– (क) छात्राः पुस्तकानि **गृहीत्वा** विद्यालयं गच्छन्ति।

(ख) मालाकाराः पुष्पैः मालाः **रचयन्ति**।

(ग) मम मनसि एका **जिज्ञासा** वर्तते।

(घ) रमेशः मित्रैः **सह** विद्यालयं गच्छति।

(ङ) **सहसा** बालिका तत्र अहसत्।

**प्रश्नः 6. पदनिर्माणं कुरुत**–(पदों का निर्माण कीजिए–)

**उत्तरम्–**

| | धातुः | प्रत्ययः | पदम् |
|---|---|---|---|
| *(i)* **यथा–** | कृ | + तुमुन् | = कर्तुम् |
| | हृ | + तुमुन् | = ........................ |
| | तृ | + तुमुन् | = ........................ |

**उत्तरम्–** *(i)* हर्तुम्, तर्तुम्।

| | | | |
|---|---|---|---|
| *(ii)* **यथा–** | नम् | + क्त्वा | = नत्वा |
| | गम् | + क्त्वा | = ........................ |
| | त्यज् | + क्त्वा | = ........................ |
| | भुज् | + क्त्वा | = ........................ |

**उत्तरम्–** *(ii)* गत्वा, त्यक्त्वा, भुक्त्वा।

| *(iii)* | **उपसर्गः** | **धातुः** | **प्रत्ययः** | = **पदम्** |
|---|---|---|---|---|
| **यथा–** | उप | गम् | ल्यप् | = उपगम्य |
| | सम् | पूज् | ल्यप् | = ........................ |
| | आ | नी | ल्यप् | = ........................ |
| | प्र | दा | ल्यप् | = ........................ |

**उत्तरम्–** *(iii)* संपूज्य, आनीय, प्रदाय।

**प्रश्नः 7. कोष्ठकेषु दत्तेषु शब्देषु समुचितां विभक्तिं योजयित्वा रिक्तस्थानानि पूरयत**–(कोष्ठकों में दिए गए शब्दों में समुचित विभक्ति का योग करके रिक्तस्थानों की पूर्ति कीजिए–)

*(i)* **यथा–विद्यालयं** परितः वृक्षाः सन्ति। (विद्यालय)

(क) .................... उभयतः ग्रामाः सन्ति। (ग्राम)

(ख) .................... सर्वतः अट्टालिकाः सन्ति। (नगर)

(ग) धिक् ....................। (कापुरुष)

**उत्तरम्–** *(i)* (क) **ग्रामम्** उभयतः ग्रामाः सन्ति।

(ख) **नगरम्** सर्वतः अट्टालिकाः सन्ति।

(ग) धिक् **कापुरुषम्!**

*(ii)* **यथा**–मृगाः **मृगैः** सह धावन्ति। (मृग)

(क) बालकाः .................... सह पठन्ति। (बालिका)

(ख) पुत्रः .................... सह आपणं गच्छति। (पितृ)

(ग) शिशुः .................... सह क्रीडति। (मातृ)

**उत्तरम्–** *(ii)* (क) बालकाः **बालिकाभिः** सह पठन्ति।

(ख) पुत्रः **पित्रा** सह आपणं गच्छति।

(ग) शिशुः **मात्रा** सह क्रीडति।

## अतिरिक्त-अभ्यासः

**(1) मञ्जूषातः उचितपदम् आदाय वाक्यानि पूरयत**–(मञ्जूषा से उचित पद लेकर वाक्य पूरे कीजिए।)

1. सहस्त्रशः तडागाः ______ शून्यात् न प्रकटीभूताः।
2. इमे एवं तडागाः अत्र ______ इति।
3. अशेषे हि देशे ______ निर्मीयन्ते स्म।
4. गजधराः ______ आसन्।
5. पुरा ते ______ आसन्।
6. इदानीं ______ शिल्पिरूपेण नैव समादृताः सन्ति।

| बहुप्रथिता, तडागाः, सहसैव, वास्तुकाराः गजधराः संसारसागराः |
|---|

**उत्तरम्**– 1. सहसैव  2. संसारसागराः  3. तडागाः  4. वास्तुकाराः  5. बहुप्रथिताः  6. गजधराः

**(2) पाठांशं पठत अधोदत्तान् प्रश्नान् च उत्तरत**–(पाठांश पढ़िए और निम्नलिखित प्रश्नों के उत्तर दीजिए–)

गजधरः इति सुन्दरः शब्दः तडागनिर्मातॄणां सादरं स्मरणार्थम्। राजस्थानस्य केषुचिद् भागेषु शब्दोऽयम् अद्यापि प्रचलति। कः गजधरः? यः गजपरिमाणं धारयति स गजधरः। गजपरिमाणम् एव मापनकार्ये उपयुज्यते। समाजे त्रिहस्त–परिमाणात्मिकीं लौहयटं हस्ते गृहीत्वा चलन्तः गजधराः इदानीं शिल्पिरूपेण नैव समादृताः सन्ति।

### I. एकपदेन उत्तरत।

1. गजधरः इति शब्दः केषां सादरं स्मरणार्थम्?
2. मापनकार्ये किं प्रयुज्यते?

### II. पूर्णवाक्येन उत्तरत।

1. गजधरः कः अस्ति?
2. गजधरः इति शब्दः अद्यापि कुत्र प्रचलति?

### III. भाषिककार्यम्

1. सुन्दरः शब्दः–अत्र विशेष्यपदं किम्? ______
2. मापनकार्ये–अत्र किं विभक्तिवचनम्? ______

   (प्रथमा द्विवचनम्, सप्तमी एकवचनम्, चतुर्थी एकवचनम्)
3. 'यः गजपरिमाणं धारयति स गजधरः' इति वाक्ये धारयति' क्रियापदस्य–
   (*i*) कर्त्ता कः? ______
   (*ii*) कर्म किम्? ______

4. पर्यायपदं चित्वा लिखत। अधुना = ________

5. सन्धिः विच्छेदः वा क्रियताम्–

(*i*) नैव = ______ + ______ (*ii*) स्मरण + अर्थम् = ______ + ______

**उत्तरम्–**

**I.** 1. तडागनिर्मातॄणाम् 2. गजपरिमाणम्

**II.** 1. यः गजपरिमाणं धारयति सः गजधरः।

2. गजधरः इति शब्दः अद्यापि राजस्थानस्य केषुचिद् प्रदेशेषु प्रचलितः।

**III.** 1. विशेष्यपदम्–शब्दः

2. सप्तमी एकवचनम्

3. (*i*) यः (*ii*) गजपरिमाणम्

4. इदानीम्

5. (*i*) न + एव (*ii*) स्मरणार्थम्

**(3) अधोदत्तपदानां लिङ्गं विभक्तिं वचनं च निर्दिशत–**(निम्नलिखित पदों के लिंग विभक्ति व वचन निर्दिष्ट कीजिए–)

| | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|
| 1. नूतनपद्धत्या | ______ | ______ | ______ |
| 2. कार्यसमाप्तौ | ______ | ______ | ______ |
| 3. प्रविधिना | ______ | ______ | ______ |
| 4. समाजेन | ______ | ______ | ______ |
| 5. अस्मिन् | ______ | ______ | ______ |

**उत्तरम्–**

| | | | |
|---|---|---|---|
| 1. | स्त्रीलिंगम् | तृतीया | एकवचनम् |
| 2. | स्त्रीलिंगम् | सप्तमी | एकवचनम् |
| 3. | पुंल्लिगम् | तृतीया | एकवचनम् |
| 4. | पुंल्लिगम् | तृतीया | एकवचनम् |
| 5. | पुंल्लिगम् | सप्तमी | एकवचनम् |

**(4) पूर्णवाक्येन उत्तरत–**(सम्पूर्ण वाक्य में उत्तर दीजिए–)

1. गजधराः कस्य कस्य दायित्वं निभालयन्ति स्म? ....................

2. प्रतिदाने ते किं न याचन्ते स्म? ....................

3. कार्यसमाप्तौ गजधरेभ्यः किं किं दीयते स्म? ....................

**उत्तरम्–** 1. गजधराः नवनिर्माणस्य सुरक्षाप्रबन्धस्य च दायित्वं निभालयन्ति स्म।

2. प्रतिदाने ते तद् न याचन्ते स्म यद् दातुं तेषां स्वामिनः असमर्थाः आसन्।

3. कार्यसमाप्तौ गजधरेभ्यः वेतनानि अतिरिच्य सम्मानम् अपि प्रदीयते स्म।

**(5) कोष्ठकदत्तस्य शब्दस्य उचितरूपं प्रयुज्य वाक्यानि पूरयत–**(कोष्ठक दत्त शब्द का उचित रूप प्रयोग करके वाक्य पूरे कीजिए–)

**(क)** 1. भगिनी ________ सह आपणम् अगच्छत। (भ्रातृ)

2. शिष्याः ________ सह गच्छन्ति। (गुरु)

3. छात्रा ________ सह वार्तां करोति। (अध्यापिका)

**उत्तरम्–** (क) 1. भ्रात्रा 2. गुरुणा 3. अध्यापिकया

**(ख)** 1. ________ उभयतः जनाः स्थिताः। (मार्ग)

2. ________ अभितः शिष्याः उपविष्टाः। (आचार्य)

3. ________ पूर्वम् के तडागान् रचयन्ति स्म? ______ (एतत्)

**उत्तरम्–** (ख) 1. मार्गम् 2. आचार्यम् 3. एतस्मात्

## बहुविकल्पीयप्रश्नाः

**(1) प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा वाक्यपूर्तिं कुरुत–**(दिए गए विकल्पों में से उचित पद चुनकर वाक्यपूर्ति कीजिए–)

1. गजधराः ______ प्रस्तुवन्ति स्म। (योजना, योजनाम्, योजनम्)

2. ते भाविव्ययम् ______ स्म। (निभालयत्ति आकलयन्ति, सगृह्णन्ति)

3. ते लौहयष्टिं ______ गृहीत्वा चलन्ति स्म। (हस्तं, हस्तेन, हस्ते)

4. नगर नियोजनम् स्यात् लघुनिर्माणम् वा ______ कार्याणि गजधरेषु एव आधृतानि आसन्। (सर्व, सर्वम्, सर्वाणि)

5. गजपरिमाणम् एव ______ उपयुज्यते। (मापनकार्यम्, मापनकार्ये, मापनकार्येण)

**उत्तरम्–** 1. योजनाम् 2. आकलयन्ति 3. हस्ते 4. सर्वाणि 5. मापनकार्ये

**(2) प्रकृति प्रत्यय संयोज्य वियोज्य वा उचित विकल्पेन रिक्तस्थानानि पूरयत**–(प्रकृति प्रत्यय जोड़कर अथवा अलग करके उचित विकल्प द्वारा रिक्त स्थान पूरे कीजिए–)

**(क)** 1. रावणं ______ (नि + हन् + ल्यप्) रामः अयोध्यां प्रत्यावर्तत।
(निहत्वा, निहत्य, निहन्य)

2. पुस्तकानि आदाय ( ______ + ______ + ______ ) छात्रः विद्यालयम् गच्छति।
(अ + दा + ल्यप्, आ + दा + क्त्वा, आ + दा + ल्यप्)

3. वृक्षात् ______ (अव + तृ + ल्यप्) वानरः दूरे अगच्छत्।
(अवातीर्य, अवतीर्य, अवतीरय)

4. अहं पाठं ______ (स्मृ + तुमुन्) प्रत्यनशीलः अस्मि।
(स्मरतुम्, स्मरितुम्, स्मर्तुम्)

5. देवं सम्पूज्य ( ______ + ______ + ______ ) सा प्रातराशम् खादति स्म।
(सम + पूज् + ल्यप्; सम् + पूज् + क्त्वा; सम् + पूज् + ल्यप्)

**उत्तरम्–**

1. निहत्य 2. आदाय 3. अवतीर्य 4. स्मर्तुम् 5. सम्पूज्य

**(ख)** 1. आ + नी + तुमुन = ______ (आनीतुम्, आनेतुम्, आनयितुम्)

2. गण् + तुमुन् = ______ (गणितुम्, गणयितुम्, गणयीतुम्)

3. त्यज् + क्त्वा = ______ (त्यजत्वा, त्यज्त्वा, त्यक्त्वा)

4. प्रष्टुम् = ______ + ______ (प्रच्छ् + तुमुन्, पृच्छ् + तुम्; प्रश् + टुम्)

5. दृश + तुमुन् = ______ (द्रष्टुम्, दृष्टुम्, दर्शितुम्)

**उत्तरम्–** 1. आनेतुम् 2. गणयितुम् 3. त्यक्त्वा 4. प्रच्छ् + तुमुन् 5. द्रष्टुम्